# Shri Raghavendratirthavirachitam MahabharatatatparyanirNayabhavasangrahah

# શ્રીરાઘવેન્દ્રતીર્થવિરચિતં મહાભારતતાત્પર્યનિર્ણયભાવસઙ્ગ્રહઃ

## Document Information

Text title : Mahabharata Tatparyanirnaya Bhavasangraha

File name : mahAbhAratatAtparyanirNayabhAvasangrahaH.itx

Category : major_works, raama, rAghavendra

Location : doc_z_misc_major_works

Author : Raghavendra Swami

Transliterated by : Aaditya Kalyanaraman

Proofread by : Aaditya Kalyanaraman

Description/comments : This is a summary of Madhvacharya's Mahabharata TatparyanirNaya in verse form.

Latest update : October 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 6, 2025

*sanskritdocuments.org*

Shri Raghavendratirthavirachitam MahabharatatatparyanirNayabhavasangrahah

# શ્રીરાઘવેન્દ્રતીર્થવિરચિતં મહાભારતતાત્પર્યનિર્ણયભાવસઙ્ગ્રહઃ

યોઽગ્રેઽભૂદ્વિશ્વગર્ભઃ સુખનિધિરમિતૈઃ વાસુદેવાદિરૂપૈઃ
ક્રીડન્ દેવૈરજાદ્યૈઃ અગણિતસુગુણો નિત્યનીચોચ્ચભાવૈઃ ।
વેદૈર્વેદ્યોઽસ્તદોષોઽપ્યસુરજનમનો મોહયન્ મર્ત્યવૃત્યા
ભક્તાનાં મુક્તિદાતા દ્વિષદસુખકરઃ પાતુ સોઽસ્માન્ રમેશઃ ॥ ૧॥

સદ્ગ્રન્થાનાં સમૂહે જગતિ વિલુલિતે યેન તદ્ભાવમુચ્ચૈઃ
વક્તું મધ્વો નિયુક્તો વ્યધિત સુવચસામુદ્ધૃતિં ભારતસ્ય ।
વેદોત્કૃષ્ટસ્ય વિષ્ણોઃ પરમપુરુષતાં તારતમ્યં સુરાણાં
વાયોર્જીવોત્તમત્વાદિકમપિ વદતાં વ્યાસમીડે તમીશમ્ ॥ ૨॥

આદૌ રૂપચતુષ્ટયીં સૃજતિ યો દેવાન્ પુરાનુક્રમાત્
બ્રહ્માણ્ડં પુરમબ્જજાદિવિબુધાન્ સૃષ્ટ્વા હરત્યન્તતઃ ।
સ્રષ્ટા પૂર્વવદસ્ય સર્વજગતો મત્સ્યાદિરૂપૈર્ભવન્
રામોઽભૂદનુજાન્વિતો દશરથાત્ પાયાત્ સ નઃ શ્રીપતિઃ ॥ ૩॥

યદ્વૃદ્ધિર્જનમોહિની મુદમિતા યદ્દર્શનાત્ સજ્જનાઃ
યેનર્ષિપ્રિયકારિણા નિશિચરીહન્ત્રા ક્રતૂ રક્ષિતઃ ।
યોઽહલ્યાં સપતિં વ્યધાત્ હરધનુર્ભઙ્ક્ત્વાઽવહજ્જાનકીં
જેતા વર્ત્મનિ ભાર્ગવસ્ય નગરીં રામો ગતોઽવ્યાત્ સ મામ્ ॥ ૪॥

ત્યક્ત્વા રાજ્યમિતો વનં વચનતો માતુશ્ચ કાકાક્ષિગં
દૈત્યં વ્યસ્ય વિકર્ણઘોણખચરીબન્ધૂન્ ખરાદીન્ ખલાન્ ।
મારીચં ચ નિહત્ય રાવણહૃતાં સીતાં વિચિન્વન્નિવ
પ્રાપ્તો વાયુસુતેન સૂર્યજયુજા રામોઽવતાદ્વન્દિતઃ ॥ ૫॥

સુગ્રીવેણ સખિત્વમાપ્ય શપથં કૃત્વા વધે વાલિનઃ
તાલાન્ સમવિભિદ્ય વાલિનિધનં કૃત્વા સ્વરાજ્યે સ્થિતમ્ ।

માર્તાણ્ડિં ચ વિધાય મારુતિયુજા યામ્યાં દિશં ગચ્છતા
સીતાન્વેષણં ઇચ્છતાબ્ધિતરણે રામોઽવતાત્ સંસ્તુતઃ ॥ ૬॥

યસ્ય શ્રીહનુમાનનુગ્રહબલાત્ તીર્ણામ્બુધિઃ લીલયા
લઙ્કાં પ્રાપ્ય નિશામ્ય રામદયિતાં ભઙ્ક્ત્વા વનં રાક્ષસાન્ ।
અક્ષાદીન્ વિનિહત્ય વીક્ષ્ય દશકં દગ્ધ્વા પુરીં તાં પુનઃ
તીર્ણાબ્ધિઃ કપિભિર્યુતો યમનમત્ તં રામચન્દ્રં ભજે ॥ ૭॥

સિન્ધું દક્ષિણમાગતો દશમુખભ્રાત્રિષ્ટદોઽબ્ધ્યર્થિતો
બધ્વા સેતુમવાપ્ય રાક્ષસપુરીં સૈન્યૈઃ કપીનાં યુતઃ ।
હત્વેન્દ્રારિ કરીરકર્ણદશકાદીન્ રાક્ષસાન્ જાનકીં
આદાયાપ્ય પુરીં સ્વરાજ્યપદવીં પ્રાપ્તોઽવતાદ્રાઘવઃ ॥ ૮॥

પ્રાપ્તઃ સામ્રાજ્યલક્ષ્મીં પ્રિયતમભરતં યૌવરાજ્યેઽભિષિચ્ય
સ્વીયાન્ રક્ષન્ સુતૌ દ્વૌ જનકદુહિતરિ પ્રાપ્ય યજ્ઞૈર્યજન્ સ્વમ્ ।
સીતાહેતોર્વિમોહ્ય ક્ષિતિજદિતિસુતાનર્થિતો દેવસઙ્ઘૈઃ
સદ્ભિર્યુક્તો હનૂમદ્વરદ ઉપગતઃ સ્વં પદં પાતુ રામઃ ॥ ૯॥

ક્ષીરાબ્ધ્યુન્મથનાદિકાત્મચરિતં દેવૈર્ગૃણદ્ભિઃ સ્તુતઃ
સજ્ઞાનાય પરાશરાખ્યમુનિના યઃ સત્યવત્યામભૂત્ ।
વ્યાસત્વેન વિધાય વેદવિવૃતિં શાસ્ત્રાણિ સર્વાણ્યપિ
જ્ઞાનં સત્સુ નિધાય સદ્ગતકલિં નિઘ્નન્ સ નોઽવ્યાદ્ધરિઃ ॥ ૧૦॥

ભૂપા યત્ર પુરૂરવઃ પ્રભૃતયો જાતા વિધોરન્વયે
યદ્વાદ્યા ભરતાદયો કુરુમુખા ભીષ્મામ્બિકેયાદયઃ ।
ભૂભારક્ષયકાઙ્ક્ષિભિઃ સુરવરૈરભ્યર્થિતઃ શ્રીપતિઃ
તત્રાવિર્ભવિતું સહામરવરૈરિચ્છન્ હરિઃ પાતુ મામ્ ॥ ૧૧॥

દેવક્યાં વસુદેવતોઽગ્રજયુતો જાતો વ્રજં યો ગતો
બાલઘ્નીશકટાક્ષહા સ્વજનનીમાન્યસ્તૃણાવર્તહા ।
યત્પૂર્વં પરતશ્ચ પાણ્ડુતનયા યત્સેવનં જજ્ઞિરે
કર્તું ધર્મમરુદ્ વૃષાશ્વિન ઇમં નન્દાત્મજં નૌમિ તમ્ ॥ ૧૨॥

સંસ્કારાન્ પ્રાપ્ય ગર્ગાત્ બહુશિશુચરિતૈઃ પ્રીણયન્ ગોપગોપીઃ
વત્સાન્ ધેનૂશ્ચ રક્ષન્નહિપતિદમનો યઃ પપૌ કાનનાગ્નિમ્ ।
વિપ્રસ્ત્રીપ્રીતિકારી ધૃતધરણિધરો ગોપિકાભિર્નિશાસુ
ક્રીડન્ મલ્લાંશ્ચ કંસં ન્યહનદુપગતોઽવ્યાત્સ કૃષ્ણઃ પુરીં સ્વામ્ ॥ ૧૩॥

પિત્રોર્બન્ધં નિરસ્ય ક્ષિતિપતિમકરોદુગ્રસેનં ગુરોર્યઃ
પુત્રં પ્રાદાત્પરેતં યુધિ વિજિતજરાસન્ધપૂર્વારિવર્ગઃ ।
પાર્થાન્ પિત્રા વિહીનાનુપગતનગરાન્ યસ્ત્વજોઽપાદ્વિપદ્ભ્યઃ
નન્દાદીનુદ્ધવોક્ત્યા ગતવિરહશુચઃ કારયન્ સોઽવતાન્મામ્ ॥ ૧૪॥

યસ્માત્ વ્યાસસ્વરૂપાદપિ વિદિતસુવિદ્યા અવાપુઃ પ્રમોદં
પાર્થા દ્રોણઃ સુતાર્થં પ્રતિગતભૃગુપો યન્નિયત્યાઽર્થકામઃ ।
તસ્માદાપ્તોરુવિદ્યો દ્રુપદમુપગતોઽનાપ્તકામોઽસ્ત્રવિદ્યાઃ
શિષ્યેભ્યઃ કૌરવેભ્યો રવિજનિરસનોઽદાત્સનોઽવ્યાન્મુરારિઃ ॥ ૧૫॥

ભૂયસ્ત્વાગતમાહવે સહ જરાસન્ધં નૃપૈર્નીતયે
જ્ઞાત્વા યસ્સહજાન્વિતોઽતિગહનં ગોમન્તમત્રાગતાત્ ।
તાર્ક્ષ્યાલ્લબ્ધકિરીટ ઉન્નત ગિરેરાપ્લુત્ય જિત્વા રિપૂન્
હત્વા સ્વીયસૃગાલમાત્મનગરીં પ્રાપ્તઃ સ નોઽવ્યાદ્ધરિઃ ॥ ૧૬॥

ભગ્નાશાન્ નૃપતીનરીન્ વ્યધિત યઃ સ્વર્ગાધિપાગ્ર્યાસને
લગ્નો ભીષ્મકસત્કૃતોઽથ યવનં જઘ્ને સતીમાત્મનઃ ।
નિઘ્નાં યોઽકૃત રુક્મિણીં સમજયદ્ દુર્ગર્વિરુક્મ્યાદિકાન્
વિઘ્નં સત્રજિદાત્મજાપતિરસૌ મે ઘ્નન્ ભવેત્સર્વદા ॥ ૧૭॥

અસ્ત્રજ્ઞેષ્વધિકોઽર્જુનોઽથ યદનુક્રોશેન ભીમં વિના
સદ્ધર્મે નિરતં દદૌ સ્વગુરવે બધ્વા નૃપં પાર્ષતમ્ ।
પુત્રૌ સ દ્રુપદોઽપિ વહ્નિવિબુધાત્ સ્ત્રીરૂપકં પ્રાપ્તવાન્
ઇષ્ટાં ધર્મજ આપ રાજ્યપદવીં સ પ્રીયતાં મે હરિઃ ॥ ૧૮॥

યત્કારુણ્યબલેન પાણ્ડુતનયા નિસ્તીર્ય નાનાપદો
ભિક્ષાન્નાશિન આગમાભ્યસનિનો હત્વા બકં દ્રૌપદીમ્ ।
ઉદ્વાહ્યાખિલભૂપતીનપિ રણે જિત્વાગતાઃ સ્વાં પુરીં
ઇન્દ્રપ્રસ્થપુરેઽવસન્ કૃતધરારક્ષાઃ સ નોઽવ્યાદ્ધરિઃ ॥ ૧૯॥

યઃ પાર્થાન્ પરિપાલયન્ હરિપુરે સ્ત્રીપુત્રસમ્પદ્યુતાન્
સંહર્તા શતધન્વનોઽષ્ટમહિષીભર્તા સુરર્ષિસ્તુતઃ ।
હત્વા ભૌમમપાહરત્સુરતરું બહ્વીરુવાહાઙ્ગનાઃ
પ્રાયચ્છદ્ધરિસૂનવે સ્વસહજાં પાયાત્સ નઃ કેશવઃ ॥ ૨૦॥

પાર્થાન્ લબ્ધસભાન્ વિધાય મયતઃ પ્રાપ્તઃ પુરં સ્વાં ગતઃ

ક્ષેત્રં કૌરવમર્કપર્વણિ પુરીં સમ્પ્રાપ્ય કર્તા ક્રતોઃ ।
પાણ્ડૂન્ પ્રાપ્ય જરાસુતે વિનિહતે તૈઃ કારયિત્વાઽધ્વરં
પ્રાપ્તઃ સ્વં પુરમચ્યુતો વિજયતે દ્યૂતે જિતૈશ્ચ સ્મૃતઃ ॥ ૨૧॥

પાર્થા યાતા અરણ્યં નિહતનિશિચરાઃ પ્રીણયન્તો દ્વિજૌઘાન્
વાર્તાં શ્રુત્વા સ્વકીયામુપગતહરિણા માનિતા સિન્ધુરાજમ્ ।
જિત્વા દુર્યોધનાદીન્ હરિહયપુરુષવ્રાતબદ્ધાન્વિમોચ્ય
પ્રાપ્તા ધર્મપ્રસાદં યમથ મધુરિપું તુષ્ટુવુસ્તં પ્રપદ્યે ॥ ૨૨॥

અન્યં વેષમુપાગતાઃ પૃથગિતો ગત્વા વિરાટાલયં
તદ્દેહસ્થહરેર્નિષેવણપરા મલ્લં તથા કીચકાન્ ।
હત્વા ગોગ્રહણોદ્યતાનપિ કુરૂન્ જિત્વા વિરાટાર્ચિતાઃ
પાર્થાઃ સ્વાન્તિકમાગતં યમજિતં ભેજુસ્તમીડેઽચ્યુતમ્ ॥ ૨૩॥

યત્સમ્મત્યા પૃષતતનુજપ્રેષિતબ્રાહ્મણોક્ત્યા
રાજ્યં નાદાદનુજજનિતસ્યામ્બિકેયોઽર્જુનસ્ય ।
યઃ સાહાય્યં વ્યધિત નગરીં કૌરવાણામવાપ્તઃ
સ્વોક્તે કૃષ્ણસ્તદનભિમતેઽવાપ્તપાર્થઃ સ નોઽવ્યાત્ ॥ ૨૪॥

સેનાં વીક્ષ્ય રણોન્મુખે કરુણયા શસ્ત્રોજ્ઝિતં ફલ્ગુનં
સદ્ગીતામુપદિશ્ય કાર્મુકધરં ચક્રેઽસ્ય યઃ સારથિઃ ।
અન્યોન્યં કુરુપાણ્ડવૈશ્ચ પૃતનાં યોઽજીઘનત્ સ્યન્દનાત્
યો ભીષ્મં નિરપાતયત્ સુતશરૈઃ પાણ્ડોસ્તમીડેઽચ્યુતમ્ ॥ ૨૫॥

દ્રોણે યુધ્યતિ પાણ્ડવૈર્વિનિહતં પ્રાગ્જ્યોતિષં પાર્થતઃ
કૃત્વા તસ્ય સુતે હતે નિશિ શિવં નીત્વાર્જુનં સૈન્ધવમ્ ।
તદ્દત્તાસ્ત્રબલાદજીઘનદતો દ્રોણે હતે દ્રૌપદેઃ
યો ભીમં ચ નિજાસ્ત્રનમ્રમકરોત્ તં નૌમિ નારાયણમ્ ॥ ૨૬॥

યત્સામર્થ્યબલેન સૂર્યતનુજે પાર્થેન યુદ્ધે જિતે
પશ્ચાચ્છલ્યમવાપ્ય સારથિવરં ધર્માત્મજં સાયકૈઃ ।
શીર્ણાઙ્ગં કૃતવત્યમું શિબિરગં પાર્થં ચ મૃત્યોરપાત્
યઃ પાર્થેન હતેઽર્કજે નૃપનુતઃ પાયાત્સ નઃ કેશવઃ ॥ ૨૭॥

શલ્યે ધર્મસુતાદ્ધતે કુરુબલે પાર્થૈઃ સમસ્તે હતે
ભીમેનાનુજસંયુત્ વિનિહત્ દુર્યોધને દ્રૌણિના ।
સુપ્તાનાં નિધને કૃતે નિશિ તતો મુક્ત્વા વિધેરસ્ત્રતઃ

પાર્થાન્ રાજ્યમિતાંશ્ચ તત્સુતસુતં યોઽપાત્સ નોઽવ્યાદ્ધરિઃ ॥ ૨૮॥

કૃષ્ણાભ્યામપિ ભૂસુરૈર્નૃપસુતો રાજ્યેઽભિષિક્તો દ્વિજૈઃ
દગ્ધે નિન્દતિ ભિક્ષુકે ખલતરે સ્વં વિપ્રતીસારતઃ ।
રાજ્યં ત્યક્તુમથોદ્યતો વચનતો યસ્યાપ્ત ભીષ્માત્તતઃ
શુશ્રાવાખિલધર્મનિર્ણયમદઃ કૃષ્ણદ્વયં ધીમહિ ॥ ૨૯॥

સ્મૃત્વા યં દ્યુસરિત્સુતો વસુરભૂદ્રાજા યદાશાસિતો
નિર્દુઃખોઽથ જુગોપ ધર્મનિરતો જિત્વા સ્વરાજ્યે કલિમ્ ।
યઃ પાર્થં સમબોધયત્ મૃતશિશું યોઽજીવયત્પાણ્ડવૈઃ
યો યજ્ઞં સમકારયત્ બહુધનૈઃ ધ્યાયામિ તં કેશવમ્ ॥ ૩૦॥

યદ્યુક્તાઃ પાણ્ડુપુત્રાઃ ક્ષિતિમથ જુગુપુઃ ધર્મરાજઃ ત્વરાવાન્
ધર્મે યત્પ્રીતયેઽભૂત્ પવનજવચનૈરામ્બિકેયં વિરક્તમ્ ।
વ્યાસાત્મા યો વનસ્થં ત્વકૃત નિજમનોઽભીષ્ટવન્તં ગતં સ્વં
નાથં પાર્થાઃ સ્મરન્તો મુમુદુરપિ પદં યસ્ય કૃષ્ણં તમીડે ॥ ૩૧॥

યો યષ્ટા વિપ્રશાપાદ્યદુકુલમવધીત્ અર્થિતોઽગાત્ સ્વલોકં
દેવૈર્ભૈષ્મ્યાદ્યુપેતો યદનુ નિજપદં પાણ્ડવા અપ્યવાપુઃ ।
દૈત્યા યદ્દ્વેષતોઽન્ધે તમસિ નિપતિતા બુદ્ધરૂપોઽભવદ્યઃ
કલ્ક્યાત્માન્તે કલે યઃ કુજનનિધનકૃત્ પાતુ સોઽસ્માન્ મુકુન્દઃ ॥ ૩૨॥

મહાભારત તાત્પર્યનિર્ણયાશયસઙ્ગ્રહઃ ।
રાઘવેન્દ્રેણ યતિના કૃતઃ સજ્જનસંવિદે ॥

ઇતિ શ્રીરાઘવેન્દ્રતીર્થવિરચિતં મહાભારતતાત્પર્યનિર્ણયભાવસઙ્ગ્રહઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Aaditya Kalyanaraman

*Shri Raghavendratirthavirachitam MahabharatatatparyanirNayabhavasangrahah*
pdf was typeset on October 6, 2025

Please send corrections to *sanskrit@cheerful.com*